# Trisuparṇa Mantrāḥa

[KYV TA 10-38 to 10-40 ]

ॐ ब्रम्हमेतु माम् । मधुमेतु माम् । ब्रम्हमेव मधुमेतु माम् ।
ॐ bram’hamētu mām | madhumētu mām |
bram’hamēva madhumētu mām |

यास्ते सोम प्रजा वत्सोऽभि सो , अहम् । दुष्ष्वप्नहन्दुरुष्षह ।
yās’tē sōmap’ prajā vat’sō (a)bhi sō , aham |
duṣh’ṣhvap’nahan’duruṣh’ṣhaha |

यास्ते सोम प्राणाङ्ँस्ताञ्जुहोमि ॥ १ ॥
yās’tē sōmap’ prāṇāges’tāñ’juhōmi || 1 ||

त्रिसुपर्णमयाचितं ब्राम्हणाय दद्यात् ।
trisupar’ṇamayāchitam’ brām’haṇāya dad’yā-te |

ब्रम्हहत्यां वा , एते घ्नन्ति । ये ब्राँम्हणास्त्रिसुपर्णं पठन्ति ।
bram’hahat’yāṁ’ vā , ēteg’ ghnan’ti |
yēb’ brāām’haṇās’trisupar’ṇam’ paṭhan’ti |

ते सोमं प्राप्नुवन्ति । आसहस्रात्पङ्क्तिं पुनन्ति । ॐ ॥ २ ॥
tē sōmam’ prāp’nuvan’ti |
āsahas’rāt’paṅ’ktim’ punan’ti | ō-m || 2 ||

ब्रम्ह मेधयाँ । मधु मेधयाँ । ब्रम्हमेव मधु मेधयाँ ॥ ३ ॥
bram’ha mēdhayāā | madhu mēdhayāā |
bram’hamēva madhu mēdhayāā || 3 ||

www.SaiVeda.net

अद्या नों देव सवितः प्रजावंत्सावीस्सौभंगम् ।

ad’yā nō dēva savita[fp]’ prajāvat’sāvīs’saubhagam I

परां दुष्ष्वप्निंयᳪ सुव । विश्वांनि देव सवितर्दुरितानि परांसुव ।

parā dush’ṣhvap’niyagm’ suva I

viśh’vāni dēva savitar’duritāni parāsuva I

यद्भद्रं तन्म , आसुंव । मधु वातां , ऋतायते मधुं क्षरन्ति सिन्धंवः ॥४॥

yad’bhad’ran’ tan’ma , āsuva I

madhu vātā , ṛtāyatē madhuk’

kṣharan’ti sin’dhavaḥa II 4 II

माध्वीर्नस्सन्त्वोषंधीः । मधु नक्तंमुतोषसि मधुंमत्पार्थिंवᳪ रजंः ।

mādh’vīīr’nas’san’tvōṣhadhī-ḥi I

madhu nak’tamutōṣhasi

madhumat’pār’thivagm’ rajaḥa I

मधु द्यौरंस्तु नः पिता । मधुं मान्नो वनस्पतिर्मधुंमाᳪ , अस्तु सूर्यः ।

माध्वीर्गावों भवन्तु नः ॥५॥

madhud’ dyauras’tu na[fp]’ pitā I

madhu mān’nō

vanas’patir’madhumāgm’ , as’tu sūr’yaḥa I

mādh’vīr’gāvō bhavan’tu naḥa II 5 II

www.saiveda.net

य , इमं त्रिसुपर्णमयाचितं ब्राम्हणाय दद्यात् । भ्रूणहत्यां वा , एते घ्नन्ति ।

ya , iman’ trisupar’ṇamayāchitam’
brām’haṇāya dad’yā-te ।
bhrūṇahat’yāṁ’ vā , ēteg’ ghnan’ti ।

ये ब्राँम्हणास्त्रिसुपर्णं पठन्ति । ते सोमं प्राप्नुवन्ति ।
आसहस्रात्पङ्क्तिं पुनन्ति । ॐ ॥६॥

yēb’ brāām’haṇās’trisupar’ṇam’ paṭhan’ti ।
tē sōmam’ prāp’nuvan’ti ।
āsahas’rāt’paṅ’ktim’ punan’ti । ō-m ॥ 6 ॥

ब्रम्ह मेधवा । मधु मेधवा । ब्रम्हमेव मधु मेधवा ॥७॥

bram’ha mēdhavāā । madhu mēdhavāā ।
bram’hamēva madhu mēdhavāā ॥ 7 ॥

ब्रम्हा देवानां पदवीः कवीनामृषिर्विप्राणां महिषो मृगाणाम् ।

bram’hā dēvānāām’ padavī[hk]’
kavīnāmṛṣhir’vip’rāṇām’ mahiṣhō mṛgāṇāām ।

श्येनो गृद्ध्राणाङ्ग्ं स्वधितिर्वनानाङ्ग्ं सोमः पवित्रमत्येति रेभन्न् ॥८॥

śhyēnō gṛd’dhrāṇāges’ svadhitir’vanānāgm’
sōma[fp]’ pavit’ramat’yēti rēbhan’ne ॥ 8 ॥

हङ्ग्ंसश्शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् ।

hagm’saśh’śhuchiṣhad’vasuran’tarik’ṣhasad’dhōtā
vēdiṣhadatithir’durōṇasate ।

नृषद्वरसदृतसद्व्योमसदब्जा गोजा , ऋतजा , अद्रिजा , ऋतं बृहत् ॥९॥

nṛṣhad’varasadṛtasad’vyōmasadab’jā gōjā ,
ṛtajā , ad’rijā , ṛtam’ bṛhate ॥ 9 ॥

ऋचे त्वा रुचे त्वा समित्स्रवन्ति सरितो न धेनाः ।

ṛchēt’ tvā ruchēt’ tvā samit’sravan’ti saritō
na dhēnāāḥa ।

अन्तर्हृदा मनसा पूयमानाः । घृतस्य धारा , अभिचाकशीमि ॥१०॥

an’tar’hṛdā manasā pūyamānā-ḥa ।
ghṛtas’ya dhārā , abhichākaśhīmi ॥ 10 ॥

हिरण्ययो वेतसो मध्य , आसाम् ।

hiraṇ’yayō vētasō mad’dhya , āsām ।

तस्मिन्त्सुपर्णो मधुकृत्कुलायी भजन्नास्ते मधु देवताभ्यः ।

tas’min’n’tsupar’ṇō madhukṛt’kulāyī
bhajan’nās’tē madhu dēvatāābh’yaḥa ।

तस्यासते हरयस्सप्त तीरे स्वधां दुहाना , अमृतस्य धाराम् ॥११॥

tas’yāsatē harayas’sap’ta tīrēēs’ svadhān’ duhānā ,
amṛtas’ya dhārāām ॥ 11 ॥

य , इदं त्रिसुपर्णमयाचितं ब्राम्हणाय दद्यात् ।

ya , idan’ trisupar’ṇamayāchitam’
brām’haṇāya dad’yā-te ।

www.SriVeda.net

वीरहत्यां वा , एते घ्नन्ति । ये ब्राँम्हणास्त्रिसुपर्णं पठन्ति ।
vīrahat'yāṁ' vā , ēteg' ghnan'ti ।
yēb' braām'haṇās'trisupar'ṇam' paṭhan'ti ।

ते सोमं प्राप्नुवन्ति । आसहस्रात्पङ्क्तिं पुनन्ति । ॐ ॥१२॥
tē sōmam' prāp'nuvan'ti ।
āsahas'rāt'paṅ'ktim' punan'ti । ō-m ॥ 12 ॥

ॐ शान्तिः शान्तिः शान्तिः ॥
ॐ śhā-n'tiśh' śhā-n'tiśh' śhā-n'tiḥi ॥

www.Sai Veda.net